"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः"।

आर्य्यिका, स्त्री, (आर्य्य + स्वार्थे कन् + अत इत्वं।) श्रेष्ठा स्त्री। इति वोपदेवः॥

आर्षः, पुं, (ऋषेरिदं। ऋषि + अण्।) विवाहविशेषः। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं। यथा, याज्ञवल्क्यः,—
"यज्ञस्थायर्त्विजे दैव आर्ष आदाय गोयुगं।
चतुर्द्दश प्रथमजः पुनात्युत्तरजश्च षट्"॥
(यथा मनुः, ३। २९।
"एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः।
कन्याप्रदानं विधिवदार्षो धर्म्मः स उच्यते"॥)
ऋषिप्रणीते त्रि॥ (यथा मनुः १२।१०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः"॥

आर्षभिः, पुं, (ऋषभस्यापत्यम्। ऋषभ + इञ्।) ऋषभपुत्त्रः। स तु भरतराजचक्रवर्त्ती। इति हेमचन्द्रः॥

आर्षभी, स्त्री, (ऋषभस्य वृषस्य प्रिया। ऋषभ + अण् + ङीप्।) कपिकच्छुवृक्षः। इति राजनिर्घण्टः।
(मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषः। यथा,
"तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता"।
कपिकच्छुशब्देऽस्या गुणादयो ज्ञातव्याः॥)

आर्षभ्यः, पुं, (ऋषभस्य प्रकृतिः। ऋषभ + ञ्य।) षण्डोपयुक्तवृषः। तत्पर्य्यायः। षण्डतायोग्यः २। इत्यमरः॥ षाँड़ेर उपयुक्त एँड़े इति भाषा॥

आर्हतः, पुं, (अर्हन् जिन एव। अर्हत् + अण्।) जिनविशेषः। तत्पर्य्यायः। वादवादी २। इति हेमचन्द्रः॥

आलं, क्ली, (आलयति भूषयतीति। आ + अल् + अच्।) हरितालं। इत्यमरः॥ अनल्पे त्रि। इति हेमचन्द्रः॥ (यथा वैद्यकरसेन्द्रसारसंग्रहे॥)
("हरितालं तालमालमालं शैलूषभूषणम्।
पिञ्जकं रोमहरणं तालकं पीतमित्यपि"॥)

आलगर्द्दः, पुं, (अलगर्द्द एव। स्वार्थे अण्।) अलगर्द्दः। जलसर्पः।

आलम्बः, पुं, (आङ् + लबि + घञ्।) अवलम्बः। आश्रयः॥ (शरणं। गतिः। "इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनम्"। इति शान्तिशतके ३। २।) अधोलम्बनम्। यथा, रामायणे,—
"शोभते किञ्चिदालम्बैः शालयः कनकप्रभाः"॥)

आलम्बनं, क्ली, (आङ् + लम्ब + ल्युट्।) अवलम्बनं। विभावविशेषः। यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।
आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्"॥
इति साहित्यदर्पणे ३य परिच्छेदः।

आलम्भः, पुं, (आङ् + लभि + घञ्।) मारणं। वधः। इत्यमरः॥ (यथा स्मृतिः, "अश्वालम्भं गवालम्भं"। मेघदूते पूर्व्वमेघे। ४६।
"आलम्भेयाः सुरभितनयालम्भजां मानयिष्यन्"।
छेदनम्। कर्त्तनम्। मनुः ११। १४४।
"कृष्टजानामोषधीनां जातानां च स्वयं वने।
वृथालम्भेऽनुगच्छेत् गां दिनमेकं पयोव्रतः"॥
स्पर्शः। आलिङ्गनम्। यथा मनुः २। १७९।
"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतं।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च"॥)

आलम्भ्या, स्त्री, (आङ् + लभि + ण्यत्।) वधार्हा। हननीया। इति वोपदेवः॥

आलयः, पुं, (आलीयतेऽस्मिन्। आ + ली + आधारे अच्।) गृहं। इत्यमरः॥ (यथा कुमारे १। १।)
"हिमालयो नाम नगाधिराजः" नैषधे, "तत्रामरालयमरालमरालकेशी"। रामायणे ३ काण्डे।
"न हि दुष्टात्मनामार्य्या निवसन्त्यालये चिरं"।
लयपर्य्यन्ते, क्ली। भागवते १ अध्याये ५। "पिबत भागवतं रसमालयम्")॥

आलवालं, क्ली, (आ समन्तात् जलस्य लवमालाति आ + लव + ला + क।) तरुमूलसेचनार्थस्वल्पजलाधारः। चारमादा इति भाषा। तत्पर्य्यायः। आवालं २ आवापः ३। इत्यमरः॥ (रघुवंशे १। ५१।
"विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्"।
माघे। "विपुलालवालभृतवारिदर्पणः"।)

आलसः, त्रि, (अलस + स्वार्थे अण्।) अलसः। आलस्ययुक्तः। इति द्विरूपकोषः॥

आलस्यं, क्ली, (अलस + ष्यञ्।) अलसस्य भावः। अलसता। तत्पर्य्यायः। तन्द्रा २ कौसीद्यं ३। इति हेमचन्द्रः॥ मन्दता ४ मान्द्यं ५ कार्य्यप्रद्वेषः ६। इति राजनिर्घण्टः॥ (यदुक्तं। "आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" इत्युक्तलक्षणो व्यभिचारिभावभेदः। सुश्रुते।
"सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता।
शक्तस्य चाप्यनुत्साहः कर्म्मण्यालस्यमुच्यते"॥)

आलस्यः, त्रि, (अलस एव। अलस + स्वार्थे ष्यञ्।) अलसयुक्तः। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ शीतकः ४ अलसः ५ अनुष्णः ६। इत्यमरः॥

आलातं, क्ली, (अलातमेव। अलात + स्वार्थे अण्।) अलातं। अङ्गारः॥

आलानं, क्ली, (आलीयतेऽत्र। आङ् + ली + ल्युट्। विभाषा लीयतेरित्यात्त्वम्।) गजबन्धनस्तम्भः। इत्यमरः॥ गजबन्धनरज्जुः। इति नीलकण्ठः॥ (रघुवंशे १। ७१।
"अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः"।
कादम्बरी। "इभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन"।
रघुवंशे ४। ६९, ४। ८१।
"गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः"।
"तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"॥)
बन्धनं। इति रायमुकुटः॥ रज्जुः। इति मेदिनी॥

आलापः, पुं, (आङ् + लप् + घञ्।) कथोपकथनं। सम्भाषणं। तत्पर्य्यायः। आभाषणं २। इत्यमरः।
(साहित्यदर्पणे, प्रथमपरिच्छेदः।
"काव्यालापाश्च ये केचित् गीतकान्यखिलानि च"।)

आलाप्यः, त्रि, (आङ् + लप् + कर्म्मणि ण्यत्।) आलापयोग्यः। आलापनीयः॥

आलावर्त्तं, क्ली, (आलमत्यर्थमावर्त्तते इति आल + आ + वृत् + अच्।) वस्त्रनिर्म्मितव्यजनं। इति हेमचन्द्रः॥ कापड़ेर पाखा इति भाषा।

आलावुः, स्त्री, अलावुः। इति शब्दरत्नावली॥ लाउ इति भाषा। (अलावुशब्देऽस्या विशेषो ज्ञेयः॥

आलावूः, स्त्री, अलावुः। इति शब्दरत्नावली॥

आलास्यः, पुं, (आलं पर्य्याप्तं आस्यं मुखं यस्य सः।) कुम्भीरः। इति हेमचन्द्रः॥

आलिः, स्त्री, (आलयति भूषयति। आ + अल भूषणे। अच इः।) वयस्या। (यथा कुमारसम्भवे। ५।८३।
("निवार्य्यतामालि किमप्ययं वटुः,
पुनर्विवक्षुः स्फुरितोत्तराधरः"।)
(आलति निर्वापयति जलं। अल वारणे। सर्व्वधातुभ्य इन्।) सेतुः। (अल्यतेऽनया। अल् + इञ्।) पंक्तिः। इति मेदिनी अमरश्च॥ सन्ततिः। इति शब्दरत्नावली॥

आलिः, पुं, (आलति दंशने समर्थो भवति। आ + अल् + बाहुलकात् इण्।) वृश्चिकः। भ्रमरः। इति हारावली अमरटीका च॥

आलिः, त्रि, (आङ् + अल् + इण्।) विशदाशयः। निर्म्मलान्तःकरणः। इति मेदिनी॥ अनर्थः। इति हेमचन्द्रः॥

आलिङ्गनं, क्ली, (आङ् + लिङ्ग + ल्युट्।) प्रीतिपूर्व्वकपरस्पराश्लेषः। कोलाकोली इति भाषा। तत्पर्य्यायः। अङ्कपालिः २ श्लिषा ३। इति त्रिकाण्डशेषः॥ परिरम्भः ४ परीरम्भः ५ परिष्वङ्गः ६ संश्लेषः ७ उपगूहनं ८। इत्यमरः॥ तत्सप्तधा यथा। आमोदालिङ्गनं १ मुदितालिङ्गनं २ प्रेमालिङ्गनं ३ आनन्दालिङ्गनं ४ हृष्यालिङ्गनं ५ मदनालिङ्गनं ६ विनोदालिङ्गनं ७। इति कामशास्त्रम्॥
("आलिङ्गनान्यधिकृताः स्फुटमापुरेव"।
इति माघः॥ यथा मेघदूते उत्तरमेघे ९।
"यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां"।)

आलिङ्गी, [न्] पुं, (आ + लिङ्ग + इनि।) आलिङ्ग्यः। मृदङ्गविशेषः। इत्यमरटीकायां स्वामी शब्दरत्नावली च॥

आलिङ्ग्यः, पुं, (आ + लिङ्ग + ण्यत्।) यवाकृतिमृदङ्गः। इत्यमरः॥ मादोल इति भाषा। यथा शब्दार्णवे॥
"चतुरङ्गुलहीनोऽश्वान्मुखे चैकाङ्गुलेन यः।
यवाकृतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते"॥

आलिञ्जरः, पुं, (अलिञ्जर + अण्।) अलिञ्जरः। इति त्रिकाण्डशेषः॥ जाला इति भाषा।

आलिन्दः, पुं, (अलिन्द + अण्।) अलिन्दः। वहिर्द्वारप्रकोष्ठः। गृहान्तरगत्यर्थवेदिका। इति रायमुकुटः शब्दरत्नावली च॥ गृहैकदेशः। इत्यमरमाला॥

आलिन्दकः, पुं, (आलिन्द एव स्वार्थे कः।) आलिन्दः। इति शब्दरत्नावली॥

आलिम्पनं, क्ली, (आङ् + लिम्प + ल्युट्।) मङ्गलालेपनं। आलिपना इति भाषा। तत्पर्य्यायः। आतर्पणं २ आदीपनं ३ मण्डोदकं ४। इति त्रिकाण्डशेषः॥